Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# शिशुपालवधमहाकाव्ये आख्यातप्रयोगवैशिष्ट्यम्



**डॉ. मधुसूदनः,**
**वरिष्ठ-शोध-अध्येता,**
**संस्कृत-संवर्धन-प्रतिष्ठानम्,**
**देहली, भारतम्।**

**सारांशः** – महाकविना माघेन शिशुपालवधमहाकाव्ये अभिन्यवीविशत् न्यधायिषातां लुनीहि अक्रमताभिज्ञार्थे हनिष्यति अतिशय्यते खट्वयन्ति उल्ललयाञ्चकार परवलयाञ्चकार अनुरञ्जयाम्बभूवुः निश्चिकाय समस्कुरुत रिरसयिषति चचायिरे अवीवृधं विपर्यणीनमन् समुदाचचार बिभर्थ समनीनहत् विडम्बयिष्यति ओषामासे व्यजिगीषन्त शुशूरे आतस्तरे उपकर्णयाम्बभूवे उदनंसिषुः वीक्षाम्बभूवे इतीत्यादीनां विशिष्टानामाख्यातपदानां प्रयोगः कृतो वर्तते।

**मुख्यशब्दः** – धात्वर्थविमर्शः, महाकवि माघः, शिशुपालवधमहाकाव्यम् , आख्यातप्रयोगः।

---

महाकविमाघेनैकस्यामेव कृतौ सर्वोत्कृष्टा प्रसिद्धिरवापि। संस्कृतसाहित्यजगति न कोऽपि तादृशः स्याद्यः शिशुपालवधमहाकाव्याभिधेयं काव्यमूरीकृतवान्न स्यात्। कविरयं न केवलं काव्यस्यैकस्मिन्देशेऽपितु सर्वेष्वपि क्षेत्रेषु सर्वेषु च शास्त्रेषु कृतभूरिपरिश्रम आसीदिति तस्य काव्येन सर्वैर्विज्ञायत एव। काव्यक्षेत्रे कविकुलगुरोः कालिदासस्योपमा भारवेरर्थगौरवं दण्डिनः पदलालित्यं च सर्वप्रसिद्धम्, किन्त्वयं महाकविर्माघः त्रिष्वपि क्षेत्रेषु समानरूपेण प्रसिद्धोऽस्ति। अर्थात् यादृशी गतिरुपमायां विद्यते तादृश्येव गतिरर्थगौरवे पदलालित्ये च विद्यते। उक्तं च – माघे सन्ति त्रयो गुणाः इति।

अस्य कवेः सर्वविधं ज्ञानमस्मिन् काव्येऽवलोक्यतेऽस्माभिः। तस्य राजनीतिशास्त्रस्य दर्शनशास्त्रस्य व्याकरणशास्त्रस्य सङ्गीतशास्त्रस्य नाट्यशास्त्रस्य काव्यशास्त्रस्यायुर्वेदशास्त्रस्य धर्मशास्त्रस्य गजशास्त्रस्याश्वशास्त्रस्य पुराणविषयकज्ञानस्य च दर्शनमस्मिन् काव्ये प्रायः सर्वत्र दरीदृश्यते। एवं महाकविमाघस्य विषये यावदपि प्रशस्तिगानं कुर्मस्तन्न्यूनमेवेति।

कस्यापि काव्यस्य कर्तुः परिचयः तस्य ग्रन्थस्य परिचायको भवति। भारतीयेतिहासे विदुषां जीवनपरिचयविषये प्रायोऽनैश्चित्यं भवति । यतो हि तैः स्वयं स्वजन्मविषये किमपि न लिख्यते। महाकविमाघस्य जीवनपरिचयविषयेऽपि सैव स्थितिर्विद्यते। स्वकीये काव्ये तैः केवलमेतावदेवालेखि यत्तस्य पितुर्नाम दत्तकः 'सर्वाश्रयः' एवं पितामहस्य नाम सुप्रभदेवश्चासीत्। तस्य पितामहः वर्मलाख्यस्य राज्ञो महामन्त्री आसीदिति। महाकवेर्जन्माचारनिष्ठश्रीमालीति ब्राह्मणकुले बभूव। अस्य जन्मकालविषयेपि वस्तुतस्तु किमपि निश्चितं नास्ति तथापि विद्वद्भिर्यथामति वर्णनं कृतं विद्यते। केचन विद्वांस एकादशशताब्द्यां कवेर्जन्म मन्वते। अन्ये च केचन विद्वांसः सप्तमशताब्द्यां स्वीकुर्वन्ति।

महाकवेः पितामहस्याश्रयप्रदातुः श्रीवर्मलाख्यराज्ञ एकः शिलालेखो वसन्तगढनगरेऽवापि। शिलोलेखोऽयं ६८२ इति वैक्रमशताब्द्यां लिखितमासीत्। अतो विक्रमसंवत् ६८२ तदनुसारम् ईसवीयसंवत् ६२५ इति सुप्रभदेवस्य समयाधारेण तस्य पौत्रस्य जन्म सप्तमशताब्द्या उत्तरार्धेऽष्टमशताब्द्याः पूर्वार्धे वा सिद्ध्यतीतीदं मतं सर्वथोपयुक्तं प्रतिभाति।

**माघकाव्ये आख्यातप्रयोगवैशिष्ट्यम् –**

महाकविः शब्दसंयोजनकलायां नूतननूतनशब्दानां प्रयोगे चात्यन्तं कुशलो वरीवर्ति। अत एव मुहुर्मुहुरधीते सत्यपि प्रतिवारं किमपि नूतनत्वं प्रतिभाति, किमपि रमणीयमाभाति, किमपि वैशिष्ट्यमनुभूयते, कश्चन विशिष्टो रसः प्रतीयते। सत्यमेव महाकविनाभाणि यत् –

**क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः[1]॥**

अमुथैव महाकविराख्यातपदानां प्रयोगेण वैयाकरणानां मनांसि अचूचुरत्। नूतनैराख्यातपदैः स्वीयां कीर्तिं चतुर्दिक्षु चकासाञ्चकार। महाकविना प्रायः सर्वविधाख्यातपदानां प्रयोगोऽकारि। भ्वाद्यदादीनां ण्यन्तसन्नन्तयङन्तादीनामाख्यातपदानां च प्रयोगं कृतवान्। क्रियापदप्रयोगेऽपि स प्रत्येकं पदेन सह ध्यानं ददाविति। उदाहरणार्थमेकोनविंशसर्गस्य चतुर्नवतितमं (९४) श्लोकं प्रस्तौमि –

**प्रापे रूपी पुराऽरेपाः परिपूरी परः परैः। रोपैरपारैरुपरि पुपूरेऽपि पुरोऽपरैः[2]॥**

अर्थात् पूर्वं मत्स्यकूर्माद्यनेकरूपवान् निष्पापः भक्तवरदः परमपुरुषो हरिः शत्रुभिः प्रापे। अन्यैररिभिरपारैरिषुभिः पुरः पुपूर इति। प्रापे – आप्लृ व्याप्तौ इति सकर्मकानिड्धातोः कर्मणि लिटि प्रथमपुरुषैकवचनम्। पुपूरे – पूरी आप्यायने इति दिवादिगणीयसकर्मकसेड्धातोः कर्मणि लिटि प्रथमपुरुषैकवचनम्। एवमेव अभिन्यवीविशत् न्यधायिषातां लुनीहि अक्रमताभिज्ञार्थे इतीत्यादीनाम् अन्येषां विशिष्टानामाख्यातपदानां विशिष्टार्थे प्रयोगः कृतो वर्तते।

**आख्यातपदार्थविमर्शः**

पदवाक्यप्रमाणज्ञमहाकविमाघकृतशिशुपालवधमहाकाव्याधारेण तत्रस्थितानामाख्यातपदानां समीक्षास्मदीयस्यास्य शोधनिबन्धस्य विषयो विद्यते। अतोऽत्राख्यातपदार्थस्य परिचयोऽत्यन्तमावश्यकं वर्तते। तच्च वैयाकरणनये- सुब्भिन्नत्वे सति संख्याबोधकप्रत्ययत्वमाख्यातत्त्वमिति लक्षणम् "सुपां कर्म्मादयोप्यर्था संख्या चैव तथा तिङा"मित्युक्तेः।

अत्र प्रप्रथममस्माभिराख्यातेति शब्दस्य विचारः क्रियते। वाजसनेयिप्रातिशाख्य उव्वटभाष्ये सोम आख्यातस्य देवता भारद्वाजश्च ऋषिरभिधीयते। तद्यथा –

**भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते। वाशिष्ठ उपसर्गस्तु निपातः काश्यपः स्मृतः[3]॥**

इत्यत आख्यातस्य सर्वतः प्राक्पारिभाषिकप्रयोगो भारद्वाजेन कृत आसीदिति ज्ञायते, गोपथब्राह्मणे सर्वप्रथमप्रयोगोपलब्धत्वात्। तद्यथा – "ओङ्कारं पृच्छामः, को धातुः, किं प्रातिपदिकम्, किं नामाख्यातम्, किं लिङ्गमित्यादि।

महर्षिपतञ्जलिनापि 'क्रियाप्रधानमाख्यातम्' इत्यत्राख्यातशब्दस्य पारिभाषिकार्थे प्रयोगः कृतोऽस्ति। आख्यातशब्दस्य मूलार्थः 'यत् कथितम्' इति। आङुपसर्गात् ख्या प्रकथने इति धातोः क्तप्रत्ययत्वात्। तद्यथा –

**धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने। समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते[4]॥**

1 शिशुपालवधमहाकाव्यम् ४/१७

2 शिशुपालवधमहाकाव्यम् १९/९४

3 संस्कृतभाषादर्शनम् – चतुर्थः काण्डः, पृष्ठम् २५८

4 कोशः, वामनशिवरामआप्टे, आख्यातशब्दे,

धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दो वाख्यातमिति। पाकश्चैत्रस्येत्यादौ नामार्थेनैव विशिष्टस्वार्थकर्त्तृत्वस्याभिधायकः षष्ठ्यादिको न तु धात्वर्थेन विशिष्टस्य । चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नस्य यत्नस्य विधेयतया बोधकावपि नामधातू न स्वार्थस्य। चैत्रः पाचक इत्यादौ तु धात्वर्थविशेषितस्य यत्नस्य न विधेयता किन्तु कर्त्तुरेव कृतां धर्म्मिशक्तत्वादन्यथा पाचकश्चैत्र इत्यादिकं योग्यमेव प्रातिपदिकार्थयोः पाचकचैत्रयोर्भेदेनान्वयस्याव्युत्पन्नतया कृदर्थकृतेश्चैत्रादावन्वयायोगाच्च। अयं पक्तुं काल इत्यादौ तुमादिना धात्वर्थावच्छिन्नोऽनुकूलत्वादिः, इयं चिकीर्षेत्यादौ च सनादिनेच्छादिरेव विधेयत्वेनानुभाव्यत इति न तत्रातिप्रसक्तिरिति।

**आख्यातशब्दस्य व्युत्पत्तिः –**

आख्यायतेऽनेनेति। एवम् आख्यायतेऽनेन क्रिया प्रधानभूतेत्याख्यातस्तिङन्तः, **'कृत्यल्युटो बहुलमि'**[5]ति करणे क्तप्रत्ययः। चन्द्रकीर्तिमते भ्वादीनां धातूनां रूपाणि निष्पाद्यन्ते येन तदाख्यातमथवा कर्तृव्यापारप्रतिपादकमाख्यातमिति। कथितं हि – आख्यायन्ते कथ्यन्ते अर्थान् निष्पाद्यन्ते भ्वादीनां रूपाणि येन तदाख्यातम् इत्यादि। पाणिनिविरचिताष्टाध्याय्यां मयूरव्यंसकादयश्चेत्यस्मिन् सूत्रे गणसूत्रत्वेनाख्यातमाख्यातेन क्रियासातत्य इति पठितम्। तत्र आख्यातपदविचारप्रसङ्गे क्रियाबोधकं तिङन्तं गृहीतम्। तथा च तिङन्तस्य तिङन्तेन सह क्रियासातत्ये सति समासो भवतीत्यर्थः स्वीकृतः। तदुदाहरणञ्चेदम् – पचतभृज्जता, खादतमोदतेत्यादि।

आख्यातपदस्य प्रसिद्धिर्दर्शनग्रन्थेषु तिङ्प्रत्ययपर्यायत्वेनापि दृश्यते। तद्यथा – वैयाकरणभूषणसारे नन्वनयोराख्यातार्थत्वे किं मानम् इत्यत्राख्यातशब्दस्तिङर्थे प्रयुक्त इत्यत्र सङ्क्षेपेण निरूपितम्।

**धात्वर्थविमर्शः –**

दधाति विविधं शब्दरूपं यः सः धातुरिति व्युत्पत्त्या धाधातोस्तुन् इत्यौणादिकप्रत्ययेन निष्पन्नोऽयं शब्दः। धातुस्त्रिविधः – मूलधातुः, प्रत्ययान्तधातुः सौत्रधातुश्चेति। तद्यथा – भू सत्तायाम्, पिपठिष, स्तुम्भु इत्यादि। धात्वर्थविषये विदुषां नैकमत्यं दरीदृश्यते। मीमांसकमते फलमेव धात्वर्थो भावना च तिङर्थः। किं करोतीति प्रश्नस्य पचतीत्याद्युत्तरदर्शनात् करोतिपचत्योः समानार्थकत्वं सिद्ध्यति। करोत्यर्थो भावना तत्समानार्थकत्वेन पचतीत्यस्यापि भावनार्थकत्वं स्वीकर्तव्यम्। तथा च पचतीत्यत्रांशद्वयं पच इति धातुस्तिबिति प्रत्ययः। तिबर्थो भावना धात्वर्थश्च फलम्।

प्राचीननैयायिकमते व्यापारो धात्वर्थ आख्यातार्थश्च कृतिः। एवं स्वीक्रियमाणे व्यापार एव शक्तिः फलन्तु कर्मप्रत्ययार्थस्तदा ग्रामं गच्छतीत्यत्र विभागस्य त्यजतीत्यत्र संयोगस्य च बोधापत्तिः। उभयोरपि व्यापारवाचकत्वाऽविशेषात्। तस्मान्नव्यनैयायिकमते फलविशिष्टव्यापारो धात्वर्थः। प्राचीनवैयाकरणकौण्डभट्टनये -

**फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।**

**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥**[6]

अस्यां कारिकायां फलव्यापारयोरित्यत्र फलञ्च व्यापारश्च फलव्यापारौ तयोः फलव्यापारयोरित्थमितरेतरयोगद्वन्द्वसमासकरणात् समासे चोभयपदार्थप्राधान्याद्धातुपदशक्यत्वं फले व्यापारे चोभयत्र तिष्ठति। एवञ्च फलमपि स्वातन्त्र्येण धात्वर्थो व्यापारोऽपि। एकवृन्तगतफलद्वयन्यायेनैकस्य धातोः शक्तिरुभयत्र वर्तते।

नव्यवैयाकरणभट्टनागेशमते तु फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च शक्तिरस्ति। फलव्यापारयोः पृथक्शक्तिस्वीकारे फलव्यापारयोर्मिथः उद्देश्यविधेयभावेनान्वयापत्तिः। कर्त्रर्थकप्रत्ययसमभिव्याहारे फलावच्छिन्नव्यापारे, कर्मार्थकप्रत्ययसमभिव्याहारे

---

5 पाणिनिसूत्राष्टाध्यायी, सूत्रसंख्या – ३/३/११३,

6 वैयाकरणभूषणसारः, कारिका- २

व्यापारावच्छिन्नफले च शक्तिः। शाब्दबोधेऽपि प्राचीनवैयाकरणनव्यवैयाकरणयोर्मध्ये मतभेदो दृश्यते। प्राचीनवैयाकरणमते सर्वत्र व्यापारमुख्यविशेष्यकशाब्दबोधो भवति। किन्तु नव्यानाम्मते कर्तृप्रत्ययसमभिव्याहारे व्यापारमुख्यविशेष्यकः कर्मप्रत्ययसमभिव्याहारे फलमुख्यविशेष्यक इति विशेषः।

भ्वाद्यदादिजुहोत्यादिदिवादिस्वादितुदादिरुधादितनादिक्र्यादिचुरादिगणीयाश्चेति महर्षिपाणिनिनिर्मितो धातुपाठो दशसु भागेषु विभक्तो विद्यते। तत्र प्रायो द्विसहस्रधातूनां परिगणनं विद्यते। शबादिविकरणभेदेन गणभेदो वर्तते। एवञ्च णिजन्तसन्नन्तयङन्तयङ्लुगन्तादिभेदनापि धातुरूपाणां सिद्धिर्भवति। तेनैकस्यैव धातोर्यथा भूधातोः – भवति, भावयति, बुभूषति, बोभूयते, बोभवीति-बोभोतीत्यादिरूपाणि पृथक्पृथगर्थेषु निष्पद्यन्ते। तद्व्याकरणशास्त्रे विस्तरेण प्रतिपादितं वर्तते।

व्याकरणशास्त्रे धातूनां द्विविधत्वं प्रतिपादितम्। तद्यथा- सकर्मकधातवोऽकर्मकधातवश्चेति। सकर्मकधातूनां प्रयोगः कर्मणि कर्तर्यकर्मकधातूनां प्रयोगो भावे कर्तरि च भवति। फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। यथा पठति लिखति पचतीत्यादि। एवञ्च फलसमानाधिकरणव्यापारवाचकत्वम् अकर्मकत्वम्। यथा शेते क्रीडतीत्यादि। धातूनां सकर्मकाकर्मकत्वञ्च रूपमपि क्रियास्वरूपेण प्रभावितं विद्यते, दर्शनभेदेन चात्रापि भेदो यथा स्यात्। तत्स्थक्रियाविचारप्रसङ्गे स्पष्टीकृतं यत् क्रियया क्रियाकृतविशेषो भासते। प्रत्येकं क्रियेप्सा-द्योतिका भावप्रतिपादिका च भवति। अतः सर्वाः क्रियाः सकर्मकाः स्युः। पुनरपि शब्दशास्त्रे सकर्मकाकर्मकविवेचनं कृतमेव वर्तते।

नागेशेन सकर्मकाकर्मकौ सार्थकौ शब्दावित्युक्तम्। तन्मते व्याकरणशास्त्रसम्पादित-कर्मसंज्ञायुक्ता धातवः सकर्मकास्तस्मादन्येऽकर्मकाश्चेति भवन्ति। एतेनाधारेणैव 'अध्यासिता भूमयः' इति प्रयोगः साधुत्वमेति।

किञ्चाकर्मकक्रियोपसर्गसंयोगः, अर्थान्तरवृत्तिरादिकारणैः सकर्मकरूपे परिणमते। 'भवति' क्रिया अकर्मिका परम् 'अनुभवति' क्रिया सकर्मिका। उपसर्गयोगबलेन सा सकर्मिका जाता। तदुक्तं महाभाष्ये महर्षिपतञ्जलिना "भवतिरयमकर्मकः। अकर्मका अपि वै धातवः सोपसर्गाः सकर्मका भवन्ति"। सैव 'भवति' क्रिया प्राप्त्यर्थे सकर्मिका वर्तते। तद्यथा "भवतिरकर्मकः।... प्राप्त्यर्थः सकर्मिकास्ती"ति। अत एवं कालदेशाधारेण सर्वाः क्रियाः सकर्मिका इति वक्तुं शक्यते।

अथ पुनः सकर्मकाकर्मकधातवः परस्मैपद्यात्मनेपद्युभयपदीति भेदेन त्रिधा भवन्ति । अर्थात् केचन धातवः परस्मैपदिनः केचनात्मनेपदिनः केचन चोभयपदिनो भवन्ति। तत्र परस्मैपदिनोऽपि धातवो भावकर्मणोरात्मनेपदे भवन्ति। एवं केचन परस्मैपदिधातव उपसर्गबलेनात्मनेपदे यथा – जयति इति व्युपसर्गेण विजयते परोपसर्गेण पराजयते तथा रमते इति उपोसर्गेणोपरमति व्युपसर्गेण विरमतीत्यादिरूपाणि भवन्ति। विस्तरस्तु व्याकरणशास्त्रे व्याख्यातं विद्यत इति।

अपि चानेकार्थका धातवो भवन्ति। महाभाष्ये १.३.१ एवं ६.१.९ इति सूत्रभाष्ये लिखितं यत् – बह्वर्था अपि धातवो भवन्तीति। धातुपाठे कुर्द खुर्द गुर्द गुद क्रीडायामेव इत्यत्र एवग्रहणं धातूनामनेकार्थकताया ज्ञापकमस्ति। एवमेव दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु लक्ष दर्शनाङ्कनयोरित्यादि। सुखमनुभवति, हिमवतो गङ्गा प्रभवति, शत्रुः पराभवतीत्यादिवाक्येषु उपसर्गेण ये पृथक्-पृथगर्थाः प्रतीयन्ते ते भ्वादिधातूनामेव। उपसर्गास्तु केवलं दीपवदन्तर्निहितधात्वर्थस्य द्योतका भवन्तीति। एतस्मिन्विषये महाकविमाघस्स्वयमेव काव्येऽस्मिन् बभाण –

**सन्तमेव चिरमप्रकृतत्वादप्रकाशितमदिद्युतदङ्गे।**

**विभ्रमं मधुमदः प्रमदानां धातुलीनमुपसर्ग इवार्थम्॥[7] इति॥**

**तिङर्थविमर्शः –**

7 शिशुपालवधमहाकाव्यम् – १०/१५,

शब्दानां प्रतिपादकं शास्त्रं व्याकरणमेवेति शब्दप्रतिपादनावसरे तस्मिन् व्याकरणग्रन्थे द्वे तत्त्वे प्रतिपादिते। ते च – प्रकृतिप्रत्ययाविति। प्रकृतिश्च द्विधा प्रसिद्धा। प्रातिपदिकं धातुश्चेति द्वे प्रकृती स्तः। प्रत्ययाश्च सुप्तिङ्कृत्तद्धितभेदैश्चतुर्विधास्सन्ति। तत्र प्रातिपदिकेभ्यः सुपः तद्धिताश्च, धातुभ्यस्तिङः कृतश्च प्रत्यया जायन्ते।

तिङ्प्रत्ययजिज्ञासायामत्र तावदुच्यते यत् – ये भूप्रभृतिधातूनामव्यवहितोत्तरजायमानाः कृद्भिन्नाः प्रत्ययाः ते तिङ्प्रत्ययाः सन्ति। अर्थात् तिप्प्रत्ययमारभ्य महिङ्प्रत्ययपर्यन्ताः तिबादयः प्रत्ययाः तिङ्पदवाच्या इति **"आदिरन्त्येन सहेता"** [8] इति सूत्रसाहाय्येन ज्ञातव्याः। **"तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्"** [9] इति सूत्रनिर्दिष्टाः तिङ्प्रत्ययास्ते प्रथममध्यमोत्तमपुरुषेषु विभक्ताः सन्तः परस्मैपदात्मनेपदभेदेन द्वेधा विभक्ताः सन्ति। प्रतिपुरुषं एकवचनद्विवचनबहुवचनानि भवन्तीत्येवमष्टादश तिङः सन्ति।

**परस्मैपदम**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | तिप् | तस् | झि |
| **मध्यमपुरुषः** | सिप् | थस् | थ |
| **उत्तमपुरुषः** | मिप् | वस् | मस् |

**आत्मनेपदम्**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुषः** | त | आताम् | झ |
| **मध्यमपुरुषः** | थास् | आथाम् | ध्वम् |
| **उत्तमपुरुषः** | इट् | वहि | महिङ् |

वाक्ये तिङन्तपदानां सर्वाधिकं महत्त्वं वर्तते। तिङन्तपदं न स्यात् तदा पदसमूहस्य वाक्यत्वमेव न सम्भवति। निराकाङ्क्षप्रतिपत्त्यर्थं तिङन्तपदमावश्यकम्, न च क्रियां विना वाक्यस्य सिद्धिः सम्भवति। अतः कात्यानेनोक्तम् –

"एकतिङ् वाक्यम्" इति। प्रत्ययग्रहणे तदन्तग्रहणनियमादत्र तिङ्पदेन तिङन्तं पदं गृह्यते। एवञ्च कर्मधारयसमासानुरोधेन "एकं तिङन्तं वाक्यं भवति" इत्यर्थं स्वीकृत्य 'ब्रूहि, ब्रूहि' इत्यत्र वाक्यद्वयत्वम्, समानवाक्यनिबन्धनिघातादिव्यवस्था च सम्पादिता। यद्यपि अस्मिन्नेव वाक्यलक्षणे एकं तिङन्तं यत्समूहे तद्वाक्यम् इति बहुब्रीहिसमासं प्रकल्प्य तिङन्तपदघटितसमूहस्य वाक्यं स्वीक्रियते पश्य मृगो धावति, शृणु मेघः गर्जति इत्यादिस्थले पचति भवतीत्यादिस्थले दोषः सम्भवेत्तथापि तत्रैकस्या एव क्रियायाः प्राधान्यं यत्र तद्वाक्यमित्यर्थस्य स्वीकारादेकवाक्यत्वमत्राव्याहतमेव। तथा च यत्र केवलं 'द्वारम्' इति निगद्यते, तत्र 'पिधेहि' इति तिङन्तपदस्याध्याहारं कृत्वा वाक्यत्वं प्रतिपादनीयम्। तेन करणीयं हसितव्यमित्यादिष्वपि अस्त्यादिक्रियाया अध्याहारः कर्त्तव्यः। अनेन वाक्यं क्रियायां सत्यामेव परिपूर्णतामेतीति तात्पर्यम्। अत एवोच्यते – 'सर्वं हि वाक्यं क्रियायां परिसमाप्यत' इति। अस्त्यादितिङन्तपदानामध्याहारो यद्यपि त्रयः काला इत्यत्र भवितुन्नार्हति तथापि ज्ञायन्ते इत्यादिक्रियाध्याहारेण वाक्यत्वं स्वीकर्तव्यम्, अमुथा वार्तिककृदनुसारं महाभाष्यकारानुसारं च तिङन्तरहितं वाक्यं नैव भवतीत्यादि।

8 पाणिनिसूत्राष्टाध्यायी, सूत्रसंख्या- १/१/७१,

9 पाणिनिसूत्राष्टाध्यायी, सूत्रसंख्या- ३/४/७८,

इदानीं शिशुपालवधमहाकाव्यस्य श्लोकेषु समागतानि कानिचन आख्यातपदानि पश्यामः –

**श्रियः पतिः श्रीमति शासितुं जगज्जगन्निवासो वसुदेवसद्मनि[10] ।**

**वसन्ददर्शावतरन्तमम्बराद्धिरण्यगर्भाङ्गभुवं मुनिं हरिः॥१/१॥**

**ददर्श** – ईक्ष लोकृ लोचृ वष्क विष्क शमो दर्शने इत्यादिदर्शनार्थकधातवः सन्ति। किन्तु दृशिर्धातुः प्रेक्षणार्थे/प्रकृष्टदर्शनार्थे विद्यते। ददर्श इत्यत्र लुलोके, शशामेत्यादीनामपि प्रयोगो भवितुं शक्नोति। परन्तु ददर्श इत्यस्यैव प्रयोगः किमर्थम्? अत्र विचार्यते - महर्षिर्नारदो यदाकाशमार्गाद्भूमाववतरति तदा सर्वैस्साकं भगवाञ्छ्रीकृष्णोपि तं ध्यानेन पश्यति। प्रकृष्टदर्शनकारणादेव महाकविना माघेनात्र विशेषतो दृशिर्धातुः प्रयुक्तः। अपि च दर्शनशब्दः समाजे समादरार्थे प्रयुज्यते। महर्षेरादरपूर्वकदर्शनकारणादपि महाकविनात्र दृशिर्धातुर्विहितः।

**वसन्ददर्श-** अत्र भूते लिडिति **'धातुसम्बन्धे प्रत्ययाः'**[11] इतिसूत्रे निरूपितम्। **सिद्धान्तकौमुद्यां मूले-** धात्वर्थानां सम्बन्धे यत्र ये प्रत्यया उक्तास्ततोन्यत्रापि स्युः। तिङन्तवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः। अन्यथा भूते लडिव वर्तमाने लिडित्यपि स्यात्। वसन्ददर्श– अतीतवासकर्तृकं दर्शनमित्यर्थः। अतीतवासे कर्ता कर्ता यस्य दर्शनस्येति व्यधिकरणपदो बहुव्रीहिः। क्रियापदस्यास्य 'चयस्त्विषामि'त्यनेन पद्येन सम्बन्धः।

**गतं तिरश्चीनमनूरुसारथेः प्रसिद्धमूर्ध्वज्वलनं हविर्भुजः।**

**पतत्यधोधाम विसारि सर्वतः किमेतदित्याकुलमीक्षितं जनैः[12]॥१/२॥**

**पतति-** गत्यर्थकोऽयं धातुर्लोकेऽधोगमनेऽर्थे प्रसिद्धः। अत्राप्यधोगमनमेवार्थः। अधोगमनन्नाम – अधोदेशसंयोगानुकूलव्यापारः। आधुनिकवैज्ञानिकस्य न्यूटन् इत्यस्य गुरुत्वाकर्षणसिद्धान्तं पूर्वमेव प्रतिपादितवान् अस्ति महाकविमाघः इति एतेन श्लोकेन विज्ञायते।

**पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत[13] ।**

**गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः॥१/१२॥**

**व्यलीयत-** व्युपसर्गपूर्वकाद्दैवादिकाल्लीङ् श्लेषणे इत्यर्थकाद्धातोः कर्त्तरि लङि तप्रत्यये श्यनि अडागमे च कृते व्यलीयत इति रूपं साधु। धातुकोशे लीङ्धातुः श्लेषणेर्थे प्रोक्तः। अत्र व्युपसर्गबलेन स्थगनम् इति पद्यगतो धात्वर्थः।

**अथ प्रयत्नोन्नमितानमत्फणैर्धृते कथञ्चित्फणिनां गणैरधः[14]।**

**न्यधायिषातामभिदेवकीसुतं सुतेन धातुश्चरणौ भुवस्तले॥१/१३॥**

**न्यधायिषाताम्-** न्युपसर्गपूर्वकाड्डुधाञ् धारणपोषणयोरित्यस्माद्धातोः कर्मणि लुङ्, प्रथमपुरुषस्य द्विवचने आताम्प्रत्यये अडागमे सिचि अनुबन्धलोपे **'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च'**[15] इति शास्त्रेण वैकल्पिकचिण्वद्भाव इडागमे षत्वे **'आतो युक् चिण्कृतोः'**[16] इत्यनेन युगागमेऽनुबन्धलोपे नि अ धा य् इ ष् आताम् इति जाते वर्णसम्मेलने च कृते न्यधायिषाताम् इति रूपं साधु। न्युपसर्गपूर्वकाद् धा धातोरत्र स्थापनमर्थः। महर्षिर्नारदो धरायाः पोषणार्थम् अर्थात् शिशुपालकृतपापमपहारयितुमिन्द्रसन्देशकथनायाभिकृष्णं

---

10 शिशुपालवधमहाकाव्यम् १/१

11. पाणिनिसूत्राष्टाध्यायी, सूत्रसङ्ख्या – ३/४/१,

12 शिशुपालवधमहाकाव्यम् १/२

13 शिशुपालवधमहाकाव्यम् ४/१२

14 शिशुपालवधमहाकाव्यम् ४/१३

15. पाणिनिसूत्राष्टाध्यायी, सूत्रसङ्ख्या – ६/४/६२,

16. पाणिनिसूत्राष्टाध्यायी, सूत्रसङ्ख्या – ७/३/३३,

स्वचरणौ स्थापितवान् इति । एवमेव महाकविना माघेन शिशुपालवधमहाकाव्ये अभिन्यवीविशत् न्यधायिषातां लुनीहि अक्रमताभिज्ञार्थे हनिष्यति अतिशय्यते खट्वयन्ति उल्ललयाञ्चकार परवलयाञ्चकार अनुरञ्जयाम्बभूवुः निश्चिकाय समस्कुरुत रिरसयिषति चचायिरे अवीवृधं विपर्यणीनमन् समुदाचचार बिभर्थ समनीनहत् विडम्बयिष्यति ओषामासे व्यजिगीषन्त शुशूरे आतस्तरे उपकर्णयाम्बभूवे उदनंसिषुः वीक्षाम्बभूवे इतीत्यादीनां विशिष्टानामाख्यातपदानां प्रयोगः कृतो वर्तते।

**सन्दर्भग्रन्थसूची**


1. आप्टे, वामनशिवरामः; ***संस्कृतहिन्दीकोश,*** मोतीलाल बनारसीदास पब्लिशर्स, दिल्ली – संस्करणम् (2007)
2. दहिया, यज्ञवीरः; ***संस्कृतभाषादर्शनम्,* भारतीय विद्याप्रकाशन, दिल्ली-7, प्रथमसंस्करणम् (2001)**
3. भट्टः, कौण्डः; ***वैयाकरणभूषणसारः***, चौखम्बा सुरभारती प्रकाशन20) ,वाराणसी ,04(
4. महर्षिः, पाणिनिः; ***चौखम्बा सुरभारती प्रकाशन,*** वाराणसी, संस्करणम् (2000)
5. माघः; ***शिशुपालवधमहाकाव्यम्***, चौखम्बा विद्याभवन, वाराणसी, संस्करणम् (2013) ।